CC-0. In Public Domain. Digitization by eGangotri

R
T·20

श्रीपशुपतिस्तव

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

ह.पु.प्र.आ.

१७

CC-0. In Public Domain. Digitization by eGangotri

३५५८ क-नि.

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

श्रीपशुपतिस्तोत्रम्

श्रीगुह्यकालीस्तुतिश्चेत्युभयम्

डोटीदेशोद्भवेन नेपालनिवासिना
जोस्युपाह्वेन.
श्रीपण्डितरामचन्द्रशर्म्मणा
विरचितम्.

THE

PASHUPATI STOTRUM

and

GUHYA KALI STOTRUM

BY

P. RAMA CHANDRA JOSHI

OF

NEPAL, BIRTH PLACE, DOTI.

काश्यां हितचिन्तकमुद्रणालये मुद्रितम्
सम्वत् १९६४ सन् १९०८.

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

३५५८

श्रीपशुपतिर्विजयतेतराम् ।

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

विज्ञप्तिः

असारापारसंसारपारावारपयःपूरपतितानामाध्यात्मिकादितापत्रयग्राहगृहीतानां जनानामुद्धारार्थमाविष्कृतमूर्तेरनन्ताऽनिर्वचनीयकल्याणगुणगणालङ्कृतस्य निगमागमगिरामप्यगोचरस्य भगवतः पशुपतेस्तथाऽनन्तकोटिब्रह्माण्डरचनादिष्वघटितघटनाविधानपटीयस्याश्चित्रचरित्राया आदिशक्तेर्भगवत्या गुह्यकाल्याश्च साकल्येन यथाबद्गुणवर्णने ब्रह्मादिदेवानामन्येषां विदितवेद्यानां सुरासुरमुनिवरविषधरनरकिन्नरनिकराणां च नास्ति शक्तिरित्याकुमारं प्रसिद्धमेव तथापि भक्तिमुखरीकृताः कृतिनो वितताननन्तावकाशाकाशे यावच्छक्यं विहगविहितमुत्पतनमिव स्वाभिमतदेवतानुतिकर्तृत्वमभिलषन्ति । तया च स्वप्रतिभानुसारेण प्रादुर्भूतया सुरनुतिसुरतरङ्गिण्या पवित्रीकुर्वन्त्यात्मनोऽन्तःकरणम्, पात्रीभवन्ति च देवप्रसादस्य, प्राप्नुवन्ति च स्वानल्पकल्पनाकल्पितग्रन्थपठनपाठनश्रवणमननप्रचारकारिजनस्फारोपकारक्रतुफलम्, श्रद्धाभक्तिपूते भगवन्नाममहिम्नैव दूरोत्सारितभ्रमप्रमादोद्भूतसर्वदोषे भगवत्स्तवे समुदयत्येव ग्राह्यबुद्धिर्गुणैकपक्षपातिनां महात्मनाम्, तथापि केवलं बालचापल्यमादायाऽज्ञातसाहित्यादितत्त्वेनाऽविदितललितमृदुपदप्रसूनग्रन्थनकौशलेनापि मया भगवद्भ्यां जगन्मातापितृभ्यां श्रीगुह्यकालीपशुपतिभ्यां कयापि प्रतिरोद्धुमशक्यया श्रद्धया समर्पितं शब्दार्थवैचित्र्यर-

CC-0. In Public Domain. Digitization by eGangotri

सालङ्कारादिविच्छित्तिविशेषरूपसौगन्ध्यरहितं चैतद्भक्ति-गुणबद्धं पद्यपुष्पमाल्यद्वयं कीटकण्टकसदृशाऽशेषदोषोत्सादनपूर्वकं शिवस्य शक्तेश्चायं प्रसाद इति बुद्ध्या सश्रद्धं स्वीकुर्वन्तु महान्त इतिसविनयमभ्यर्थये, उपहारीकरिष्यामि चैतद्विनापि मूल्यं विद्वद्वरेभ्यः, अतो ये रसिका जिघृक्षवस्ते पत्रद्वारा प्रकाशयन्तु स्वाशयमिति।

विज्ञापको जोस्युपाह्वो

रामचन्द्रशर्म्मा

यटखाटोल् नेपाल।

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः।

पशुपतिस्तोत्रम्

यः श्लेष्मान्तककानने गिरिजया मृग्या रिरंसुर्मृगी-
भूतो मार्गित ईश्वरो दिविषदां वृन्दैरमन्दश्रमैः ॥
ज्ञातस्त्र्यक्षतयाऽच्युतेन्द्रविधिभिःशृङ्गे धृतश्चोत्प्लुतः
पारेवाङ्मतिकं स्थितः पशुपतिः पायादपायात् स माम्॥
येन स्वीयजटाकटाहकुहरे रिङ्गन्तरङ्गीकृता
गङ्गा यच्चरणाब्जलुब्धगिरिजासौभाग्यसौख्यस्पृहा ॥
आर्यातीर्थनिवासलालसमिषादागत्य पादाब्जयो-
र्नीचैर्मूर्तिमती लसत्यनुदिनं तं नौमि गङ्गाधरम् ॥२॥
ईशोऽनीश इवैकवक्त्रवचनैर्नानावरानेकदा
दातुं तुण्डचतुष्टयं सकरुणं धत्ते चतुर्वर्गदः ॥
योऽध्यास्ते नयपालपत्तनमुमानाथः स नाथो मम-
ऽनाथस्याऽस्तु सदैव नाथितमनोऽभीष्टप्रदः शङ्करः ३॥
योऽनारोपिततत्त्ववित्त्वयि शिवे शक्तौ च नो भेददृक्
तेनाऽऽलोक्यमलौकिकं जगति यत् पश्यन्ति न प्राकृताः।

१ नेपालमाहात्म्यानुसारेण नान्यस्यादिशब्दस्यायोगवलोकनात्सिद्धो गिरिजामृगीको नाम्नी-
मन्यत्र या सर्वत्र लोकः। एषा प्रथमपद्योक्ता कथा स्कन्दपुराणान्तर्गते नेपाल-
माहात्म्ये प्रसिद्धा। २ गङ्गाया धर इति प्रसिद्धे षष्ठीतत्पुरुषे कथानुसन्धानेन गङ्गा ऽधरे
नीचैर्यस्येति बहुव्रीहि.र्व्यक्तीकृतः।

CC-0. In Public Domain. Digitization by eGangotri

श्रीयन्त्रं शिरसि प्रलिख्य भवतः कुर्वन्ति यत्रार्चनं
तत् पञ्चानन पञ्चमं तव मुखं मौख्र्यापहं स्यान्मम ॥४॥
वाग्द्वारोद्गतवाङ्मती स्पृशति यत्पादोदकं पादगा
यत्केलीगृहदेहलीमुपगतेवाऽऽस्ते च गुह्येश्वरी ॥
यत्सेवापटवः सुरा मृगमिषान्नित्यं मृगाणां स्थलीं
सेवन्ते प्रणमामि तं पशुपतिं भक्तैककल्पद्रुमम् ॥५॥
सर्वस्त्वं न परोऽस्ति चेति नमकाऽध्यायोक्तरुद्रात्मकै-
र्मन्त्रैर्नित्यमुपासते श्रुतिपरास्तन्त्रैश्च यं तान्त्रिकाः ॥
यद्दीप्तिर्जयतीन्द्रनीलरुचिजिद् यन्मन्दिरं कौबुरं
भास्वद्रत्नशतान्वितं विजयते सोऽव्यात् पशूनाम्पतिः॥
मुक्तयै गर्जति भासुरे हिमगिरेरन्तर्गते पर्वते
भुक्तयै भक्तजनेप्सिताधिकतरोत्कर्षैकयुक्तयै च यः ॥
तं नित्यं प्रणमामि, यामि शरणं, तस्यैव नाऽन्यो यतो
मादृक्पातकिपातकक्षयकरः कारुण्यरत्नाकरः ॥ ७ ॥
दिव्याऽऽर्याजलनिर्मलीकृततनुः सन्ध्यामुपास्य क्षणं
ध्यात्वा शङ्कर! धूर्जटे! पशुपते! मां त्राहि चेति ब्रुवन् ॥
साष्टाङ्गं प्रणमन् भजामि मनसा श्रीदक्षिणद्वारगो
गात्रं त्वत्करुणावलोकनविधेः पात्रं कदा स्यान्मम ॥८॥

---

१ चमकाऽध्यायोक्ता वाजश्चमइत्यादिमन्त्रा इव नमोहिरण्यबाहव इत्यादयो मन्त्रा नमकाऽध्यायोक्ता ज्ञेयाः २ सौवर्णम्.

CC-0. In Public Domain. Digitization by eGangotri

राज्यप्राज्यसुखार्थदानरसिका श्रीराजराजेश्वरी
वात्सल्यैककुतूहला विलसति श्रीवत्सला शीतला ॥
तापघ्नी, जयभारती परिचरत्यत्यन्तवाक्सिद्धिदा
चैवं शक्तिभिरावृतः पशुपतिर्धन्यो नतानुग्रहः ॥ ९ ॥
सर्वा सृष्टिरितः प्रवेशसदनञ्चैतन्निदानं स्थितेः
स्वात्मारामममहेशमोहदमहामायारहस्यस्थलम् ॥
एतद्बोधनतत्परा सकरुणा गुह्येश्वरी गुह्यजा
यच्छक्तिर्द्रुतसिद्धिदाऽस्ति जपतां गम्भीररन्ध्राकृतिः १०
भक्तानाऽऽह्वयतीव दानरसिका प्रालेयगिर्युद्भव-
द्वातव्रातविधूतपादपचलच्छाखात्मकैः पाणिभिः ॥
त्वच्छक्तिर्मणिचूडशैलशिखरे ताराऽवताराऽपरा
योगिन्यष्टकनायिका पशुपते ! श्रीवज्रयोगिन्यपि ॥ ११ ॥
श्रीमद्दक्षिणकालिका त्रिजगतामाद्याऽनवद्याद्भुत-
प्रोद्यत्काव्यविधानदाननिपुणा नैर्ऋत्यादिग्भागगा ॥
अङ्गीकृत्य यदर्चनं वलियुतं कार्यं जनैरीहितं
द्रागद्यापि फलप्रदं जयति सा शक्तिः परा शाम्भवी १२ ॥
तुङ्गेऽनेकविहङ्गराजिरुचिरे दोलाचले चम्पक-
द्रूद्यद्दिव्यकलेवरः सगरुडो नारायणस्त्वत्प्रियः ॥
एतेऽन्ये च परश्शताः सुरगणाः क्षेत्रेऽत्र नित्यं स्थिता
स्त्वां ध्यायन्ति महेश ! शक्तिसहिता यस्त्वं तदैश्वर्य्यदः

CC-0. In Public Domain. Digitization by eGangotri

स्थानाऽऽप्यायनपाचनप्रचलनध्वानाऽध्वराऽऽह्लादन-
ध्वान्तध्वंसनकर्मशालितनुभिर्जीवोपभोगोद्यतम् ॥
भूम्यम्भोदहनाऽनिलाऽभ्रेयजमानेन्दुग्रहेशाऽऽकृतिं
वन्देऽमन्ददयं क्षमैकनिलयं गौरीप्रियं चिन्मयम् १४
क्षुत्क्षामोऽन्नमिव, स्मरार्दितजनःकान्तामिव, ग्रीष्मगः
पान्थः शीतसरोवरोदकमिवा, ऽवित्तश्च लक्ष्मीमिव, ॥
रोगाक्रान्त इवौषधं, मम मनस्त्वामेव कैवल्यदं
वेगाद्भावतु जातु नैतु विषयं शम्भोऽनिशं भो प्रभो! १५
कण्ठेकाल ! करालकालकलितप्राणप्रयाणक्षणा-
त्पूर्वं त्वच्चरणारविन्दभुवनं सत्कर्मसोपानतः ॥
आरोहत्वरमेव देव ! विषयभ्रान्तं मनो यद्गतं
मृत्युर्नाक्रमते भवो विरमते कैवल्यमुज्जृम्भते ॥१६॥
गौरीकान्त! नितान्तशान्तमथ मत्स्वान्तं निशान्तज्वल-
द्दीपस्याऽल्पशिखेव यातु विलयं निर्वृत्तिकं सत् त्वयि ॥
ध्यातृध्येयविभागशून्यधिषणासम्पादितैकात्मता-
प्रोन्मीलन्निजचित्स्वरूपसुखभुक् स्यां त्वत्कृपातः कदा॥
जाग्रत्स्वप्नसुषुप्तिषु त्रिगुणवद्बुद्धेरवस्थासु य- १७
द्भात्यज्ञानविजृम्भितं बत पुराकारं शरीरत्रयम् ॥

---

१ भूम्यम्भोदहनाद्याकृतेर्भगवतः स्थानाप्यायनादिकर्माणि क्रमाद्ध्यानि २ आकाशम्
३ सूर्यम् ४ शीघ्रमेव

CC-0. In Public Domain. Digitization by eGangotri

तज्ज्ञानप्रद ! साऽनुकम्प ! भवतः पादैकलोप्यं यत-
स्तस्माच्च त्रिपुरान्तकस्तदभिधेन्द्रारेर्वधादेव न॥१८॥
यं सौराष्ट्रगतं नतोन्नतिकरं श्रीसोमनाथाभिधं
लक्ष्मीभूभृति मल्लिकार्जुनमथाऽवन्त्यां महाकालकम्॥
कावेरीयुतनर्मदातटकुटे चोङ्कारनाथं बुधाः
श्रीमत्प्रज्वलिकावने मुनिधने यं वैद्यनाथं जगुः १९
सेतौ विप्रविघातपातकहरो रामेश्वरः सिन्धुजे,
याम्ये दारुवने फणीश्वरघने यो नागनाथाह्वयः ॥
गोदावर्यतिशालिसह्यशिखरे यस्त्र्यम्बकाकारतः
काश्यां योभवतारको विजयते विश्वेश्वरस्याऽऽत्मना२०
यो घुस्मेश्वरसंज्ञया परिणुतः श्रीमानिलापत्तने
केदारेश्वररूपतो हिमगिरौ यो डाकिनीस्थानगः ॥
भीमेशो भयहृत् स एव जगतामाद्यो द्विषट्कात्मको
ज्योतिर्लिङ्गसमष्टिरिष्टफलदो नेपालचूडामणिः॥२१॥
विश्वे[1] विश्वपमानिनोपि विबुधा विश्वं सविश्वैम्भरा[3]-
स्त्रातुं न प्रभवः पयोधिजविषात्[4] त्वां नीलकण्ठं विना
तज्जोऽयं गलनीलिमा वदति ते जीवौघजीवातुतां
त्रैलोक्यैकमहेशतां प्रकृतिजां काश्चित्कृपां चाऽधिकाम्

१ क्वचित् पुराणान्तरे तु घुसृणेश्वर इति संज्ञा च दृश्यते २ सर्वे ३ विष्णुसहिताः
४ तत्त्वं तवैवाऽपिब इति वा पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

नान्या वाङ्मतिका नदी गिरिभवा साक्षान्निलिम्पापगा
नाऽन्यच्चेन्धनमण्डपाख्यनगरं वाराणसीयस्थलात् ॥
नाऽप्यन्यः पशुपः स एव भगवान् विश्वेश्वरो मुक्तिदः
सर्वात्मैकसमष्टिशम्भुविषये भेदप्रसक्तिः कुतः ॥ २३ ॥
प्रयातः पातालादनुसरति यां वासुकिफणी
पुरारातेः ! याते शिखरिणि भवाब्ध्येकतरणी ॥
सशैली शैलीं सा तनुरतनुमाहात्म्यमहिता
हिताय स्तादस्ताखिलसुकृतकार्यस्य च मम ॥२४॥
जटाजूटेऽनङ्गप्रतिभट ! लुठन्ती सुरसरि-
च्चलन्मुक्तागुच्छावलिरिव न किं भाति भवतः ॥
न किं कस्तूरीवद्गलगरलमप्यङ्गभासितं
न किं रौप्यक्षोदच्छुरितसितलेपोपमरुचि ॥ २५ ॥
घनश्यामे विष्णौ मयि च घनसारोपमरुचौ
जनानामज्ञानात्स्फुरति बत भेदाऽध्यवसितिः ॥
द्वयोर्नौ नो भेदस्त्वणुपरिमितो ऽपीत्युपदिशन्
घनश्यामीभूतो ननु सिततनुस्त्वं पशुपते ! ॥ २६ ॥
सतां मुक्तिद्वारे श्रुतिवचनसारे शशिधरे
प्रपञ्चस्याधारे प्रणतविपदुद्धारचतुरे ॥

---

१ काष्ठमण्डपाख्यनगरम् २ पार्वतीसहिता ३ शिलामयी ।

CC-0. In Public Domain. Digitization by eGangotri

कृपापारावारे भुजगपतिहारे स्मरहरे
विषाहारे भक्तिर्भवतु मम पारेप्रकृतितः ॥ २७ ॥
परे देवाः सेवामुदितमनसः स्वाननुचरान्
सगर्वं कुर्वन्तु द्रविणतनयैश्वर्य्यपदगान् ॥
परं मृत्युर्मृत्युञ्जय तव कृपाजय्य इह मे
प्रमाणं त्वत्सेवारसिकबकदाल्भ्यादिमुनयः ॥ २८ ॥
पवित्स्त्वं पापाद्रे, रविरिह ममाऽज्ञानतमसः,
सदोद्यन्मत्काव्यानुपमरचनाया भव कविः ॥
छविस्ते मच्चित्ते विलसतु च वित्तेशसुहृदो
हविर्भावं यायादखिलमपि मत्कर्म भवति ॥२९॥
न जानेऽम्बाजाने ! विविधमतजानेकभजन-
प्रकारान् प्राकारानिव निरयरुग्रोधनकरान् ॥
परं जाने गाने भवहृतिनिदाने तव कृते
परब्रह्मावाप्तिर्भवति यदि भुक्तिस्तु करगा ॥ ३० ॥
अहं पुण्यैर्हीनो विषयरसपीनोऽतिमलिनो
भवत्पादाम्भोजस्तुतिनतिषु लीनोऽर्द्धवयसि ॥
जगद्रक्षादीक्षामुपगतवता हन्त भवता
स्वकारुण्याद्रक्ष्यः कथमपि दयाब्धे ! पशुपते ! ३१

---

१. सम्यन्तोभवच्छब्दः

CC-0. In Public Domain. Digitization by eGangotri

जने लिप्सा दित्सा त्वयि च सलिले शैत्यमिव या
चिकीर्षा पापानां मम तव जिहीर्षाऽप्युदयते ॥
स्वभावः सर्वेषां जगति विदितो दुष्परिहरो
यतोऽतस्त्वं दृष्टिं वितर मयि काञ्चित्सकरुणाम् ३२
पुरा यद्दुष्पूरोदरभरणचिन्तार्तमनसा
दृढैराशापाशैः शिव ! शिव ! निबद्धेन च मया ॥
स्तुता भूपाः कूपानिव गतवता क्षीरजलधिं
परित्यज्य त्वां तत्स्मृतिपथगतं पीडयति माम्॥३३॥
यथा स्मारं स्मारं परपुरुषसौख्यं प्रकुरुते
परासक्ता नारी विविधमपि कर्म स्वगृहगम् ॥
तथाऽसद्व्यापारैरहमहमिकाशालिभिरह-
र्निशं बद्धस्याऽपि प्रसरतु हर !त्वां मम मतिः॥३४॥
अहेयं किं हेयं किमपि विदितं नास्ति यदपि
मया ज्ञातप्रायं तदपि न पुनर्ज्ञातमिव मे ॥
यतः सच्चाऽसद्वा द्वयमपि भवत्येव कलितं
जनानामज्ञानादिति शिवविदां वादनियमः ॥ ३५ ॥
सुसंकल्पः पूर्वं सुकृतकरणे, स्वीयभरणे
प्रवृत्तोऽसद्वृत्तो भवति च निवृत्तोऽथ सुकृतात् ॥
हृदाऽनिच्छन् पापं परहृदयतापं च कुरुते
नियुक्तः केनाऽयं पशुप ! नृपशुं पाहि विवशम् ॥३६॥

CC-0. In Public Domain. Digitization by eGangotri

श्रिताश्चूताइछायामथ सुरभिगन्धं ददति चेत्
फलाशाशालिभ्यः पथि पथिकसङ्घेभ्य इह किम् ॥
स्मृतो मुक्त्यै भुक्तिं दिशति न सतीशः सकरुण-
स्तथाऽपीयं तृष्णा विषयजलधौ मज्जयति माम् ३७
पिशाचीयं तृष्णा त्वमसि च पिशाचाधिपपति-
र्निवार्याऽऽर्याजाने ! यदि च मयि धार्यैव भवता ॥
तदा त्वत्पादाब्जस्मृतिविधिषु तां योजय विभो !
यतः स्यान्मे लोकद्वयजसुखसीमान्तगमनम् ॥३८॥

शिवेति यन्नाम शुभैकधाम
निकामसैश्वर्य्यनिबन्धदाम ॥
विरामभूर्जन्मततेः, प्रयामः
कं वामदेवादपरं, क्व साम ॥ ३९ ॥
रक्षैकदक्षं प्रणतैकपक्षं
दक्षात्मजाप्रेमकटाक्षलक्ष्यम् ॥
त्र्यक्षं परोक्षं बहिरीक्षणाना-
मीडे स मेऽक्ष्णोर्विषयः सदाऽस्तु ॥४०॥
गौरीकराम्भोरुहमार्दवं च
क्रौर्यं नमद्देवकिरीटकोटेः ॥
येनानुभूतं वरदं वरेण्यं
शैवं पदं तच्छिवदं ममाऽस्तु ॥ ४१ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रतिक्षणं त्वां हृदि धारयन्तो
ये त्वत्कृपादृष्टिकटाक्षलक्ष्याः ॥
कलत्रपुत्रद्रविणादिभाज-
स्त एव धन्या जगतां च मान्याः ॥ ४२ ॥
अदान्तगन्धर्व इवेह चित्तं
नो पैति सन्मार्गमिदं स्मरारे ! ॥
सितानुलिप्तो बहुबोधितोऽपि
निम्बो हि तैक्त्यं न निजं जहाति ॥ ४३ ॥
स्रोतस्वतीरंह इवाऽवरुद्धं
चोपैति नीचैर्विषयान्मनो मे ॥
शम्भो ! भवानेव निवर्त्य तद् द्राक्
स्वपादपद्मभ्रमरं करोतु ॥ ४४ ॥
अमन्तु जन्तुर्नयतोऽप्यभीः स्या-
दहन्तु मन्तुप्रचुरस्तथाऽपि ॥
बिभेमि नो दण्डधरौघमूलं
स्मरामि यद्धस्तगतत्रिशूलम् ॥ ४५ ॥
यशस्त्रिलोकीप्रसृतं पवित्रं
देवैर्नुतं गाङ्गमिवोदकं ते ॥

१ अश्वः

CC-0. In Public Domain. Digitization by eGangotri

मत्कर्णयोर्भूषणमस्तु शम्भो !
रसप्रदं स्याद्रसनाग्रगं वा ॥ ४६ ॥
मृत्योर्विजेता वरदानचेताः
कृशानुरेता दिविषद्विनेता ॥
द्रुतप्रसादोऽतिदयार्द्रपादो
विराजसे त्वं त्वमिवेन्दुमौले ! ॥ ४७ ॥
सुधा मुधा गर्जति तत्सदक्षा
द्राक्षाविपक्षाऽथ जरामृतिद्विट् ॥
शैवी कथा सर्वरसैकमूला
निपीय यासुज्झति सर्वतृष्णाम् ॥ ४८ ॥
वन्दारुवृन्दारकवृन्दवन्द्ये
सर्वार्थदे जाग्रति चन्द्रचूडे ॥
मा जल्प कल्पद्रुम ! कामधेनो !
मा गर्ज मातर्युवयोस्त्रपा स्यात् ॥ ४९ ॥
गाथेव गौरी तव देव ! वन्द्या
गौरी च गाथेव गिरामगम्या ॥
क्षमा दयेवाथ दया क्षमेव
पूर्णाऽस्ति राकोदितचन्द्रिकेव ॥ ५० ॥
दैत्याः कृतान्तं, गिरिजा स्वकान्तं,
वेदान्तिनश्चिन्मयमद्वितीयम् ॥

CC-0. In Public Domain. Digitization by eGangotri

भक्ताः सुरद्रुं, प्रमथाःस्वनाथं,
त्वां मेनिरे स्वस्वमतानुरूपम् ॥ ५१ ॥
अलाविषुः पापतरूंस्त्वदीया,
अकार्षिषुः पुण्यमगण्यमग्र्यम् ॥
अतानिषुः स्वःसुखमैहिकं, च
विधेहि मां चाऽद्य शिव ! स्वकीयम् ॥ ५२ ॥
न तच्च पुण्यं न नरत्वदं य-
न्न तन्नरत्वं यदकृत्यकारि ॥
न तच्च कृत्यं यदि भक्तिहीनं
न सा च भक्तिर्यदि नेशतुष्टिः ॥ ५३ ॥
स्थित्या भाति श्रीपतिरम्भोजनिजन्मा
सृष्ट्या भाति ध्वान्तनिरासादपि भास्वान् ॥
लोकाह्लादाद्भाति विधुस्त्वं लयलीला-
युक्तस्तेषां भासि गुणौघैरधिकैश्च ॥ ५४ ॥
वार्या माया भेदमतिर्मे परिहार्या
कार्या दीने सद्गुणहीनेऽप्यनुकम्पा ॥
आर्याजाने ! दुष्कृतपङ्क्तिर्मम मार्या
चेतोवृत्तिर्नित्यमखण्डा त्वयि धार्या ॥ ५५ ॥
कामारिस्त्वं कामितकामार्पणकारी
स्थाणुश्च त्वं ज्ञानघनोऽसि स्वयमीश! ॥

CC-0. In Public Domain. Digitization by eGangotri

रागी रागद्वेषविहीनो भगवंस्त्वं
चित्रं मित्रं पापलवित्रं चरितं ते ॥ ५६ ॥
प्राहुर्विष्णुं दशशतवक्त्रं यमनन्तं
निश्शेषत्वं नैति स शेषः स्तुतिकार्ये ॥
धत्ते जाड्यं जाड्यहरा ऽपि स्वयमीशा
वाचां, शम्भोर्यस्य कथं स स्तुतिगम्यः ॥ ५७ ॥
किम्वा योगी बद्धजटोऽयं धृतभस्मा
किम्वा साक्षाच्छम्भुरयं स्याद्धृतचन्द्रः ॥
यस्मिन्नेषा संशयजाऽऽदौ गिरिजोक्ति-
स्तस्मै नित्यं नाथ नमस्ते करवाणि ॥ ५८ ॥
नान्यद्[1] याचे याचकवृत्तिः किमपीमां
याचे याऽन्तः सर्पति सर्पान्मयि दृष्ट्वा ॥
एतद्वाक्याद् यस्य सहास्याद्गिरिपुत्री
ह्रीभीकामाऽऽलिङ्गितदेहा स शिवोऽव्यात् ॥ ५९ ॥
नेयं भिक्षा परिणयदीक्षायुतभिक्षो
र्योग्या याऽन्नद्रव्यगरिष्ठाऽपि लघिष्ठा ॥
याऽऽदौ दाक्षी[2] सैव मदीया मदिराक्षी
देयेत्युक्तिस्ते मदभीष्टं विदधातु ॥ ६० ॥

१ नान्यद्याचइत्यादिपद्यषट्कसूचिताकथाब्रह्मवैवर्तेस्पष्टा—
२ दाक्षायणीतिवक्तव्ये केवलाऽपत्यार्थविवक्षायामिञ् याऽनन्येच्छा सैव मदिच्छा-विषयेयमिति वा पाठः

CC-0. In Public Domain. Digitization by eGangotri

पाणिम्प्राप्ते पर्वतपुत्र्याः करकञ्जे
गुञ्जद्भृङ्गेन्मूर्छितमाले तव कण्ठे ॥
वाद्यद्वाद्ये जयजयवादैरतिहृद्ये
याऽऽसीत्तुष्टिः सा मदभीष्टं वितनोतु ॥६१॥
वामभागविलसद्गिरिकन्यां
सर्वसद्गुणगणैरतिधन्याम् ॥
या करोति निखिलेप्सितपूर्तिं
तां नमामि जगदीश्वरमूर्तिम् ॥ ६२ ॥
व्याघ्रचर्मपरिवेष्टितगात्रं
भक्तलभ्यविभवस्थितिपात्रम् ॥
वेदतत्त्ववचनेड्यचरित्रं
संस्मरामि जगदेकपवित्रम् ॥ ६३ ॥
सर्वचित्तगगनैकविहारी
ज्ञानसारसविकासनकारी ॥
बुद्धिमान्यतिमिरौघविदारी
भानुमानिव न किं वृषचारी ॥ ६४ ॥
ह्लादकस्तनुभृतां धृतकालः
स्वीयकैरवकुलव्रजपालः ॥
शङ्करस्थितिपरो मृगसङ्गः
किं न भाति विधुवद्धृतगङ्गः ॥ ६५ ॥

CC-0. In Public Domain. Digitization by eGangotri

रोगरुद्धकुहरे सति कण्ठे
नीलकण्ठ ! विकलेन्द्रियवर्गे ॥
अग्रगामिनि यमानुचरौघे
रक्षिता त्वदपरो न दयाब्धे ! ॥ ६६ ॥
दीननाथ ! सततं सकृपं त्वां
प्रार्थयामि भवतः कुरु पारम् ॥
वारिदो दिशतु वारि न वा तं
चातकस्तु खलु याचत एव ॥ ६७ ॥
भक्तिरेति यदि ते पदपद्मे
नैति चेदसुगमे स्मृतिरीश ! ॥
कुत्रचिद्भवतु जन्म न हानि-
र्भावना तव न हास्यति चेन्माम् ॥ ६८ ॥
दुर्वासनानिबिडरागमदादिपङ्के
त्वत्पादपङ्कजयुगं करुणैकबीजम् ॥
तृष्णापयस्युदयतां मम हन्तडागे
पङ्के हि पङ्कजजनेर्जनकः प्रसिद्धः ॥ ६९ ॥
संकल्पकल्पनपटीयसि मानसे मे
प्रादुर्भवन्ति बहुवृत्तिशतानि यस्मिन् ॥
तत्र त्वदङ्घ्रिनखचन्द्रजचित्प्रकाश-
श्लाघ्याऽप्युदेतु जगदीश्वर ! काऽपि वृत्तिः ॥ ७० ॥

CC-0. In Public Domain. Digitization by eGangotri

शाखासहस्रवति मानसपादपे मे
क्वापि प्रभो ! फलतु सर्वरसैकगोलम् ॥
त्वय्येकतास्फुरणरूपफलं यदाप्तौ
प्राप्यं न किञ्चिदिति तत्त्ववित्दाम्प्रवादः ॥७१॥
वाचामगोचर ! गिरा मनसा च तन्वा
यद्यन्मयाऽस्ति रचितं श्रुतिवाग्विरुद्धम् ॥
ज्ञात्वा तदार्यमपि मे भवतः कृपालोः
पश्येत् परः क इह निर्जरपङ्क्तिगण्यः ॥ ७२ ॥
सौदामिनीपवनपारदचापलाच्च
स्फारं चलं मम मनः स्थिरतां न याति ॥
कारागृहे नृपतिदण्ड्यमिवैनमीश !
स्वीये प्रवेशय परे पदपञ्जरे त्वम् ॥ ७३ ॥
हीनाश्च साधनगणैः, सुगुणैश्च दीना
मीना इवाल्पजलगाः परितापलीनाः ॥
पीनाः परासुविभवैश्च जनाः, पिनाकिन् !
गुप्तास्त्वयात्र बहवः किमु मां जहासि?॥७४॥
बन्धो न संसृतिभवो नच पापगन्धो
नाथे प्रसन्नमनसि त्वयि दीनबन्धो ! ॥

---

१ श्रुतिरितिस्मृत्यादेरप्युपलक्षणम् २ मुखमपि

CC-0. In Public Domain. Digitization by eGangotri

अन्धोपि दिव्यदृशमेति भवत्प्रसादा-
च्छम्भो ! स्वयैव दयया भव सुप्रसन्नः ॥७५॥
पापैकमूर्तिमलसं मलसङ्किनं मां
यत्त्वं प्रवर्तयसि नाथ ! निजस्तवेऽस्मिन् ॥
तेनैव सर्वशुभसूचकसद्वरेण
स्वान्ते न माति मम कोपि बहुप्रमोदः ॥७६॥
वाचं विलापबहुलां न शृणोषि चेन्मे
कस्याग्रतो गिरिश ! रोदिमि किं वदामि ? ॥
कम्वा, क्वयामि भवतः करुणापि कुत्र
त्यक्ता त्वया पदमुपैष्यति चेति चिन्ता ॥७७॥
सर्पिः पयस्यसि, पयस्यपि सद्रसस्त्वं
गन्धो भुवि त्वमसि खे निनदस्त्वमेव ॥
अन्येषु वस्तुषु च सारतया स्थितं त्वां
प्रालेयपर्वतसुतापतिमाश्रयामि ॥ ७८ ॥
अच्छे मणौ मणिनिभेऽम्भसि दर्पणादौ
चैकोपि भाति बहुधेव यथा दिनेशः ॥
तद्वत्त्वमेव जगदीश्वर ! चित्स्वरूपो
नानेव भासि न परोस्ति जगत्त्रयेऽस्मिन् ॥७९॥

१ घृग्धे २ जले, पयः क्षीरं पयोऽम्बुचेत्युभयत्र कोशः ॥

CC-0. In Public Domain. Digitization by eGangotri

विश्वेश ! विश्वमखिलं भवतः प्रभूतं
त्वद्रूपमेव न परं विविधात्मकं च ॥
आद्यन्तयोर्यदिह वस्तु यदात्मकं तत्—
तद्रूपमेव हि घटो न मृदोऽतिरिक्तः ॥ ८० ॥
गौरीगजाननगुहप्रियैतैकपात्रं
सद्भस्मधूलिधवलीकृतसर्वगात्रम् ॥
पापैकदुर्व्यसनदुर्जनगर्वदात्रं
चिन्मात्रमीशमनिशं हृदि भावयामि ॥८१॥
पञ्चोपचारयजनाय भवन्तु तेऽमी
पञ्चेन्द्रियोत्थविषया मम पञ्चमूर्ते ॥
पञ्चाननाजिनपटावृत पञ्चवर्णः
पञ्चाननाऽस्तु तव मन्त्रवरो मदास्ये ॥८३॥
त्वत्सत्कथारससुधापरिपूरितौ मे
कर्णौ च ते चरणयोर्नमदुत्तमाङ्गम् ॥
पाणी च पूजनपरौ रसनाऽभिधाने
पादौ प्रदक्षिणगती भवतां स्मरारे ॥ ८३ ॥
पुण्यारण्यविहारी
स जयति दिव्यः शिवाभिधः सिंहः ॥

---

१ प्रेमैकपात्रम् प्रेमा ना प्रियताहार्दमित्यमरः २ पञ्चायतनस्थेवमूर्ते
३ व्याघ्रचर्मपटावृत ४ पञ्चाक्षरः ५ पञ्चाननेतिचसंबोधनम्

CC-0. In Public Domain. Digitization by eGangotri

यन्नामनादमात्रात्
पापेभेन्द्राः पलायन्ते ॥ ८४ ॥
पशव एव नो पशवः
पशवो मर्त्याश्च बुद्धिवैकल्यात् ॥
ये त्वाम्प्राप्य पुरारिं
संसारारिं न सेवन्ते ॥ ८५ ॥
तस्मात्त्रिलोकनेतः
पशुपतिनाम्ना विराजसे लोके ॥
यस्मान्निगमगिराऽमी
जीवाः पशवो निगद्यन्ते ॥ ८६ ॥
मन्वादिशास्त्रदृष्टं
प्रायश्चित्तं पुनाति किं चित्तम् ॥
यावत्त्वत्कृपयेश !
ज्ञानं नोदेति मर्त्यानाम् ॥ ८७ ॥
मन्त्रं शिवेति ङेन्तं
नम इत्यन्तं जपन्ति ये भक्ताः ॥
धर्मार्थकाममोक्षा-
स्तेषां करगाः क्रमात्के न ॥ ८८ ॥
तृष्णैषा विषयाणां
नोज्झति बध्नाति देव ! दुर्वारा ॥

CC-0. In Public Domain. Digitization by eGangotri

वारय पूरय वैनां
द्वयमपि कर्तुं समर्थोऽसि ॥ ८९ ॥
त्रिभुवनजयकामं छिन्ननेन्दोत्तमाङ्गं[1]
दशमगलविलूनोद्युक्तचित्तं दशास्यम् ॥
अभिमतफलदानैर्लब्धकामं प्रचक्रे
य इह नतसुरद्रुस्तं नमामीन्दुमौलिम् ॥९०॥
अभिमतफलदाता यो हि नेपालनेता
पशुपतिपदधाता बुद्धिवृत्तिप्रमाता ॥
प्रणतमनुजयाताऽऽयातहर्ता, प्रहर्ता
त्रिपुरमकरकेत्वोः, सोस्तु मे त्राणकर्ता॥९१॥
स जयति निजपादस्पर्शजानन्दवृन्दो-
च्छलदमलविशालोल्लोलकोलाहलां यः ॥
कलिजकलुषकोशप्राणिपावित्र्यकर्त्रीं-
मसृजदमरवन्द्यो वाञ्छतीं स्वीयहासात् ॥९२॥
द्विजमुखकमलोद्यद्द्रुमन्त्रौघघोष-
श्रवणचणमुनीन्द्रा दिव्यपक्षिस्वरूपाः ॥
पवनधुततरूणां देवशाखाश्रितास्त्वां
निपतदमलपुष्पैरर्चयन्तीति मन्ये ॥ ९३ ॥

---

१ छिन्नमवशीर्षम्

CC-0. In Public Domain. Digitization by eGangotri

अव भव ! बहुदुःखाकारसंसारतो मा-
मपसरतु च माया मोहदा तेऽद्य मत्तः ॥
अधिगतनरदेहश्चाविवेकैकगेहं
बत पशुसदृशं मां याऽकरोद्वारयैनाम् ॥
अनन्तादिनमध्यगद्युमणिदीप्तिसम्मर्दिनी
तुषारगिरिनन्दिनी हृदयधैर्यसंचालिनी ॥
भवाम्बुनिधितारिणी स्वपददायिनी सुस्मिता
तनोतु तनुरैश्वरी मम सुभव्यमठ्याहतम्॥९५॥
गजाननषडाननाननविलोकनस्मारित-
पुराकृतरहःक्रियाप्रमुदितोमया सत्रपम् ॥
सहासमवलोकितः सरसहास्यतो लास्यकृत्
स्वदासजनदासतां दिशतु पार्वतीवल्लभः॥९६॥
यदर्चनविधौ पुरा कमललोचनोऽब्जोनतां
समीक्ष्य निजलोचनं दशशताऽब्जपूर्त्यै दिशन्॥
अवाप जगदीशतां स हरिपूज्यपादाम्बुजः
शिवो जननजालतां जरयताज्जगज्जाङ्गलिः ९७
किराततनुधारिणं किरिकृते कृतायोधनं
पुरार्हणनिवेदितोपकरणैर्लसद्विग्रहम् ॥

---

१ समयेतिसमासान्तर्गतं चरमपदम् २ वराहः ।

CC-0. In Public Domain. Digitization by eGangotri

समीक्ष्य च विबुध्य यं प्रणतिकृत्प्रपेदेऽर्जुनः
प्रसादमतुलं, स मे भवतु सत्प्रसादप्रदः ॥९८॥
सुवर्णजयिवर्णयाऽऽभरणकर्णयाऽपर्णया
दलत्कनकवल्लिमद्रजतशैलवच्छोभितः ॥
चलद्धवलचामरोपमगजाननाऽऽनर्तित-
स्फुरद्दृशनवीजितो भवतु मे श्रिये श्रीश्वरः९९
नमोस्तु भवतेऽवते पशुपते ! नमः शम्भवे
नमो दुरितदानवक्षयविधायिने शूलिने ॥
नमो नतसुरद्रवे त्रिदशपत्तनस्थायिने[1]
क्षमस्व मम हृद्वचस्तनुकृताऽपराधव्रजान् ॥ १०० ॥
अनेकजनपातकव्रजविघातक ! व्यापक !
प्रपन्नजनपालक ! प्रकृतकार्यसम्पादक !
ललाटधृतपावक ! प्रमथनायक ! त्र्यम्बक !
प्रसीद भवतारक ! त्वमसि मद्विपद्वारकः ॥ १०१ ॥
सदोदरदरीभृतेः परधनाङ्गनाद्याहृतेः
परोक्तिलवनार्दृतेः[2] कपटवञ्चनादेः सृतेः[3] ॥
अचिन्त्य ! बहुचिन्तयाऽऽकुलितमानसं सागसं
समुद्धर कृपाकृते ! पशुपतेऽद्य मां संसृतेः ॥१०२॥

---

१ त्रिदशपत्तनं देवपत्तनं देवपाठइतिति लोकप्रसिद्धस्थलं तत्र स्थायिने
२ परोक्तिच्छेदनादरस्य ३ मार्गस्य

CC-0. In Public Domain. Digitization by eGangotri

नियतिहतमतेरलब्धशान्ते-
र्धनिकजनानुनयेषु दत्तदृष्टेः ॥
अकृतदुरितनिष्कृतेस्त्वदन्यः
प्रभुवर ! शङ्कर ! शङ्करो न मेऽस्ति ॥१०३॥
मृतिमृगयुदृशोः[1] पुरः स्थितस्य
गृहजनपाशसितस्य[2] चाऽस्य जन्तोः ॥
मृतिमदपशुपाशनाशहेतोः
पशुपतिपादयुगात् परागतिर्न ॥ १०४ ॥
अपि कपोलकराङ्गुलियोगजै-
र्ध्वनिभिरस्थिरनर्तनकीर्तनैः ॥
कनकविल्वदलैर्जलधारया[3]
प्रमुदितो वरदो न हरात् परः ॥ १०५ ॥
सरससत्कृतिसत्कृतिचातुरी-
विरहिता सहिताऽप्यसदुक्तिभिः ॥
नुतिरियं प्रमुदेऽस्तु शिशूक्तिवत्
सहजसौहृदशालिकपालिनः ॥ १०६ ॥
तीर्त्वा मोहमहोदधिं पशुपते ! त्वद्रागसुग्रीवयुग्
लोभद्वेषमदादिराक्षसयुतं चाऽज्ञानपङ्क्त्याऽऽननम् ॥

१ मृतिरेव मृगयुर्व्याधस्तस्य दृशोरग्रे स्थितस्य २ गृहजनरूपैः पाशैः सितस्यबद्धस्य षिञ् बन्धने तस्मात्क्तः ३ धत्तूरः ४ अज्ञानरूपं वज्ञाननम् ।

CC-0. In Public Domain. Digitization by eGangotri

हत्वाऽऽनीय निजाऽनुभूतिरतिदां विद्यात्मिकां जानकीं[1]
नाम्नैव प्रथितोऽपि रामगगुणैः स्यां रामचन्द्रोऽधुना १०७
तृष्णैषा बहु याचते भगवते वाच्यं मया किम्प्रभो !
ह्यन्तर्याम्यसि भक्तकामितपदोत्सर्गे निसर्गोद्यतः ॥
भिक्षाभ्यासजुषा तथापि करुणामूर्ते ! शिव ! प्रार्थ्यसे
स्यान्मे लेखपटे तटेऽपि गणनात्वद्भक्तपङ्क्तेरिति १०८॥

रसज्ञाविद्द्रुमरप्रशंस्यै-
स्त्वद्भक्तिकल्पद्रुमजैर्महेश ! ॥
अष्टोत्तरश्लोकशतप्रसूनै-
र्विनिर्मितं माल्यमिदं गृहाण ॥ १०९ ॥
दिव्योक्तिहीनाऽपि वधूर्नवीना
यथा पतिप्रेमवती कुलीना ॥
तथा भव त्वं कविते ! शिवस्य
प्रियेष्टदा मे पठतां सतां च ॥ ११० ॥
दोषाकरश्चेत्स्तुतिसम्प्रविष्टो
भवेत्तदा हास्यति किं महेशः ॥
इति प्रिये ! शेमुषि ! मा खिदस्त्वं
दोषाकरस्तच्छिरसा गृहीतः[2] ॥ १११ ॥

१ जनकेनप्राप्ता तत्सम्बन्धिनी ब्रह्मविद्यापि जानकीत्युच्यते
२ चन्द्रो खानेश्च दोषाकरशब्दाभ्यामुच्येते

CC-0. In Public Domain. Digitization by eGangotri

भास्वच्छास्त्रतृतीयलोचनजुषः सत्कीर्तिभूतिद्युति-
प्रोद्दीप्ताः परभारतीसुरधुनीसंधारिणो भूचराः ॥
ये रुद्राः शिवभक्तिदोक्तिरसिका विद्वच्छलाः शीलिन-
स्तेप्यत्र प्रदिशन्तु पूतजननीं दिव्यां दृशं कामपि ॥
अमृतरससवित्रीं सज्जनाः पापहर्त्रीं ११२
पशुपतिनुतिपूतां रामचन्द्रीयवाचम् ॥
पिबत सततमेतां, शङ्करस्तोत्रपाठा
द्भवतविजितजाग्रद्धर्मकामार्थमोक्षाः ॥ ११३ ॥

इतिश्रीनेपालदेशान्तर्गतडोटीदेशजनिना ने-
पालनिवासिना जोस्युपाह्वेन श्री-
मदीश्वरीदत्तपण्डितात्मजेन
रामचन्द्रशर्म्मणा रचितम्
श्रीपशुपतिस्तोत्रम्
समाप्तम्
सं० १९६४
मुद्रित
मेतन्माघमासी-
येधवलदलेसप्तम्यां शनौ

१ भस्म २ परकीयाया वाग्गङ्गाया धारिणः

CC-0. In Public Domain. Digitization by eGangotri

श्रीगुह्यकाली विजयतेतमाम् ।

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ।

गुह्यकालीस्तुतिः ।

तटे श्रीवाड्मत्याः स्ववटकपटेऽन्तर्गतघटे[1]
जगत्प्रादुर्भूतिस्थितिहृतिकृते कूर्द्दनकुटे[2] ॥
स्थितां दिव्यां काञ्चिच्चिदमृतभृतां गुह्यचरितां
नताङ्गो वन्देऽहं पशुपतिमहाराजमहिषीम् ॥ १ ॥
रहोवासी दासीकृतविषयराशीष्टहृदयः
स्मरध्वंसी हंसीकृतमतिरसङ्गेऽपि गिरिशः ॥
ययाऽकामः कामं परिणयनकामो व्यरचि सा
जगद्वृद्धिश्रद्धा तव जयति गुह्येश्वरि ! परा ॥ २ ॥
विरिञ्चिं भारत्या मदनमथ रत्या मुररिपुं
रमाया रोहिण्या विधुमपि विधाय प्रियतमम् ॥
तथाऽन्यासामन्यानपि वशगतानीशरमणी
स्वसृष्टिं याऽतानीत्प्रतियुगमगण्यां जयति सा ॥ ३ ॥
हरीशब्रह्माणः स्थितिहृतिविधानेषु निपुणा
बभूवुर्यासां श्रीगिरिजानिगिरां[3] शक्तिभिरलम् ॥

---

१ सुन्दरश्वभ्रच्छलेऽन्तर्घटे २ लीलाभवने
३ लक्ष्मीकालीसरस्वतीनाम्

CC-0. In Public Domain. Digitization by eGangotri

समस्तास्ता देव्यस्त्रिगुणसंमतायास्तव कला—
स्त्वमेवाऽऽद्या यस्मात्प्रकृतिरसि गुह्येश्वरि! शिवे! ॥४॥
अहं मन्ये धन्ये! तुहिनगिरिकन्ये! ऽतिरुचिरं
भवत्कुण्डं वाचां बहिरयनतुण्डं सुकृतिनाम् ॥
यदम्भो दम्भोलिर्भवति ननु जाड्यस्य मुखगं
झराकाराः स्फारा जनयति जनो यन्मधुगिरः ॥५॥
सुगुह्यस्त्वद्गर्तः किमु निधिरयं गुह्यकपते-- ?
भवद्भाण्डागारं किमनुचरलभ्यार्थलसितम्!॥
यदर्चाकारिभ्यो दिशति दशदिग्भ्योऽपि विभवं
हृतं नष्टं यस्मान्मिलति यदलभ्यं तदपि च ॥ ६ ॥
समन्ताच्छैलेन्द्रव्रजकलितदुर्गावृतरहः—
स्थले या नेपाले पशुपकृतशालेऽच्छसलिले॥
स्थिता केभ्यः किं किं काति कति ददामीत्यहरह
र्घटान्तर्वार्वाक्यैर्वदति बुलवुल्कारकपटैः ॥७॥
निधायाऽङ्के पङ्केरुहदलदृशं दक्षतनयां
परासुं च प्रेम्णा भ्रमति सति शम्भौ क्षितितले ॥
गलद्वात्रात्तस्याः पतितमिह गुह्यं जननि! ते
पदं प्रादुर्भूतेरभवदखिलोद्धारणकृते ॥ ८ ॥

१ यद्यपि पुराणान्तरे गुह्यपतन स्थाने कामाक्षादेवीपीठमित्युक्तं तथापि. स्कन्द-पुराणान्तर्गत हिमवत्खण्डाद्युक्तकथया बहुवृद्धशिष्टजनोक्तिपरम्परया च नेपालस्थं गुह्यकालीप्रादुर्भूतिस्थलमेव सतीगुह्यपतनस्थानमध्यवसेयं पुराणान्तरोक्तिस्तु कामाक्षा-दिपदानामर्थान्तरकल्पनेन कल्पभेदादिना वा समधिया ।

CC-0. In Public Domain. Digitization by eGangotri

जगद्रक्षादक्षे सति च ननु दक्षाध्वरहरे
विना ते कारुण्यं जननि ! जगतो नाऽवनविधिः ॥
नहि प्रातस्तातः क्षिपति च पयः पोतकमुखे
न मात्राऽनुक्तोऽप्युत्सृजति शिशुसौख्यार्हविभवम् ॥९॥
अपारव्यापारभ्रमणनिपुणाऽन्तःकरणजो--
ऽपराधः क्षन्तव्यः क्षणमपि हि गुह्येश्वरि ! मम
न पूजा न ध्यानं न च मनुजपो नाऽपि नियम-
स्तवाऽकारि द्वारि स्थितिनियमभाजा धनवताम् १० ॥
परेषां सर्वेषामपि सुमनसां दैन्यविदुषां
प्रकुर्वन्तु ध्यानं प्रणतिमपि कुर्वन्तु गिरिजे ! ॥
परं लेखं धातुः प्रबलमपि सम्मार्ज्य वरदा
सदोद्यत्कारुण्या जयति भवती काऽप्यनुपमा ॥ ११ ॥
सुकूजद्गन्धोलीपिकशुकमयूरादिरुचिरे
निकुञ्जे वाङ्मत्याः शिशिरमरुताऽऽन्दोलितकुजे ॥
मृगस्थल्यासन्ने विधृतवपुषे शङ्करजुषे
नमस्तुभ्यं मातर्वितर मयि दृष्टिं सकरुणाम् ॥ १२ ॥
नमस्या[2] गुह्येड्या[3] विकलवरिवस्या[4]ऽपि कुरुते
तव द्राक् सिद्धिं यां प्रकृतसकलाऽभीप्सितविधेः ॥

१ इतस्ततश्चालितवृक्षे २ पूजा ३ गुप्तेश्वरस्तत्रस्थः शम्भुस्तच्छक्तया
४ कलाहीना अपूर्णशुश्रूषाऽपि

CC-0. In Public Domain. Digitization by eGangotri

न साऽपर्णे ! पूर्णा भवति मनुजानामिह कलौ
समस्तैरभ्यस्तैर्मनुजपतपोराशिभिरपि ॥ १३ ॥
नमस्तस्यै यस्याः पदकमलधूलीमुपगतो
दरिद्रो मूढोपि क्षितिसुतधनैश्वर्यनिकरैः ॥
समृद्धःसद्बुद्धिर्भवति परमानन्दपदभाक्
कृपापाङ्गं सा मे गिरिपतिकिशोरी प्रदिशतु ॥ १४ ॥
स्तुता देवैर्याऽम्बा मधुदितिजयुक्कैटभमरिं
लुलायं धूम्राक्षं क्षतजजनिचण्डादिसहितम् ॥
निशुम्भं शुम्भञ्च प्रणतगणतापाऽपहृतये-
ऽवधीत्साऽस्मत्तापत्रयमपि जरीहर्तु गिरिजा ॥ १५ ॥
ज्वलत्क्रोधे राज्ञि प्रचुरदरदे घोरसमरे
मरुद्भूते पोते ग्रहगदविषाग्न्यादिजभये ॥
त्वमेका सर्वेषां शरणमसि दुर्ज्ञेयचरिते !
जगन्मातर्दुर्गे ! मम च भयहन्त्री भव शिवे ! ॥ १६ ॥
कटाक्षप्रक्षेपो भवति तव यस्मिन् सुकृतिनि
क्षमाकान्तिश्रीर्ह्रीद्युतिमतिदयाऽऽद्याऽखिलकलाः ॥
तमेकं वृण्वन्तीति च तव नुतिर्नातिमहती
यतो मुक्तिश्चाग्रे सरति, शरदिन्दुप्रभमुखे ! ॥ १७ ॥

---

१ महिषासुरं २ क्षतजजनीरक्तबीजः ।

CC-0. In Public Domain. Digitization by eGangotri

प्रभावोत्साहश्रीबलधृतिशरीराकृतिगुणैः
सुवेद्यान् कौन्तेयानपि जननि ! वैराटनगरे ॥
भवत्स्तुत्या गुप्तान्न विदुरहहाऽत्यन्तचतुरा
जनाः सर्वे, धन्या त्वमसि जनतामोहजननी ॥१८॥
अखण्डब्रह्माण्डोद्भवभरणसंहारचतुरे !
कियान्भारो मादृक्पतितमनुजोद्धारणविधेः ॥
भवत्या, भूयात् किं कमठवपुषो मन्दरगिरेः
समुद्धर्तुर्भारो जननि ! परमाणोरपि हरेः ॥ १९ ॥
निशुम्भोऽयं दम्भो विषयविषकुम्भोऽयमतुलो
न किं शुम्भो लम्बोदरजननि ! जम्भो बहुमदः ॥
लुलायो लोभोऽयं मधुरपि महामोहकपटो
द्विषन्तीमे भक्तांस्तव जगति तान्मारय पुनः ॥ २० ॥
अगम्यं त्वद्रूपं कविवरगिरां गौरि ! गिरिशो
यदाकृष्टो हृष्टो विरतिरसपुष्टोऽपि सततम् ॥
चतुर्वक्त्रैर्गायंस्तव बहुगुणान् भूरिनयनै[1]
रतृप्तस्त्वां पश्यन्निह वसति दिव्ये शिखरिणि॥२१॥
अये गुह्ये ! कालि ! द्रुहिणवनमालिद्विपमुख-
प्रभाशालिव्यालावलिपतिकपालिप्रभृतयः ॥

१ पशुपतेश्चतुर्वक्त्राणामेव दर्शनात्तथोक्तिः ।
२ प्रभाशाली सूर्यः । ३ व्यालावलिपतिः शेषः ।

CC-0. In Public Domain. Digitization by eGangotri

सुराः सर्वे वेदा नच किमु सखेदास्तव नुते- ?
रपारव्याहारे शरणगतिसारे ऽतिगहने ॥ १२ ॥
अयं रामश्चन्द्रद्युतिजयिमुखे चन्द्रचरमा-
भिधानस्त्वद्ध्यानेतरसुकृतहीनस्तव नुतौ ॥
अशक्तस्त्वद्भक्तस्त्वयि निहितलोकद्वयभर—
स्त्वमेवैनं दीनं सदयहृदये पाहि गिरिजे ! ॥ २३ ॥
आविद्यद्रुममूलकृन्तनविधौ विद्याऽनवद्या परा
भ्राजद्राजकुलप्रसादजननी त्वं गुह्यनीत्यात्मिका ॥
त्वं दिव्या प्रतिभा कवीन्द्रहृदये शब्दार्णवे दुर्गमे
नानार्थप्रतिपादिनी पदगता शक्तिर्गिरामीश्वरि! ॥ २४ ॥
भो गुह्येश्वरि ! गुह्यचित्रचरिते ! साष्टाङ्गयोगक्रमात्—
प्राप्यां कामपि चिन्मयीं तव तनुं प्राहुर्जना योगिनः ॥
तत्तद्वस्तुनिषेधदक्षसुपथा वेदान्तिनस्तान्त्रिका
मन्त्रोपासनतो, भवच्छरणतो नाऽन्या गतिः काऽपि मे ॥
श्रीरामचन्द्रकृतिनः कृतिरेषा मनोहरा ॥
गुह्यकालीप्रसादेन पठतां स्यादभीष्टदा ॥ २६ ॥
इति श्रीनेपालदेशान्तर्गतडोटीदेशजनिना नेपालनि
वासिना जोस्युपाह्वेन श्रीमदीश्वरीदत्तपण्डि-
तात्मजेन रामचन्द्रशर्मणा रचिता
श्रीगुह्यकालीस्तुतिः समाप्ता ।

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

श्रीसरस्वती विजयते ।

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Q23.HHH5
SHA
1969 B.S.

Z.1.3442

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri